# ॥ ब्रह्मसूत्राधिकरणानि ॥

.. Brahma-Sutra - adhikarana ..

sanskritdocuments.org

July 25, 2016

# Document Information

Text title : Brahmasutra Adhikarana List
File name : brahmasuutraadhikaraNa.itx
Category : sUtra
Location : doc_z_misc_major_works
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Sunder Hattangadi sunderh at hotmail.com
Proofread by : Sunder Hattangadi sunderh at hotmail.com
Description-comments : The text is based on Shankarabhashya (not Ramanuja, Madhva)
Source : Sw. Gambhirananda's translation of Shankara Sutra Bhasya, and Belvalkar Brahmasutrapatha
Latest update : July 15, 2016
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ ब्रह्मसूत्राधिकरणानि ॥

ब्रह्मसूत्राधिकरणानां अनुक्रमणिका अथवा ब्रह्मसूत्राधिकरणसूचिः

The text is based on Shankarabhashya

## ॥ ब्रह्म सूत्राणि ॥

| | | | | | |
|---|---|---|---|---|---|
| अध्यायाः | ४ | १ समन्वय | २ अविरोध | ३ साधन | ४ फल |
| पादाः | १६ | ४ | ४ | ४ | ४ |
| अधिकरणानि | १९१ | ३९ | ४७ | ६७ | ३८ |
| सूत्राणि | ५५५ | १३४ | १५७ | १८६ | ७८ |

### १ समन्वय

| अध्यायः । | अधिकरण ३९ | सूत्राणि १३४ |
|---|---|---|
| पाद १ | १-११ | १-३१ |
| पाद २ | १२-१८ | ३२-६३ |
| पाद ३ | १९-३१ | ६४-१०६ |
| पाद ४ | ३२-३९ | १०७-१३४ |

### २ अविरोध

| अध्यायः । | अधिकरण ४७ | सूत्राणि १५७ |
|---|---|---|
| पाद १ | ४०-५२ | १३५-१७१ |
| पाद २ | ५३-६० | १७२-२१६ |
| पाद ३ | ६१-७७ | २१७-२६९ |
| पाद ४ | ७८-८६ | २७०-२९१ |

### ३ साधन

| अध्ययः । | अधिकरण ६७ | सूत्राणि १८६ |
|---|---|---|
| पाद १ | ८७-९२ | २९२-३१८ |
| पाद २ | ९३-१०० | ३१९-३५९ |
| पाद ३ | १०१-१३६ | ३६०-४२५ |
| पाद ४ | १३७-१५३ | ४२६-४७७ |

### ४ फल

| अध्यायः । | अधिकरण ३८ | सूत्राणि ७८ |
|---|---|---|
| पाद १ | १५४-१६७ | ४७८-४९६ |
| पाद २ | १६८- १७८ | ४९७-५१७ |
| पाद ३ | १७९-१८४ | ५१८-५३३ |
| पाद ४ | १८५-१९१ | ५३४-५५५ |

१ समन्वय

| अध्यायः । | अधिकरण ३९ | सूत्राणि १३४ |
|---|---|---|
| पाद १ | १-११ | १-३१ |
| पाद २ | १२-१८ | ३२-६३ |
| पाद ३ | १९-३१ | ६४-१०६ |
| पाद ४ | ३२-३९ | १०७-१३४ |

अध्यायः १
पाद १
अधिकरण १-११
सूत्राणि १-३१

००१ जिज्ञासाधिकरणम् ॥

००२ जन्माद्यधिकरणम् ॥

००३ शास्त्रयोनित्वाधिकरणम् ॥

००४ समन्वयाधिकरणम् ॥

००५ ईक्षत्याद्यधिकरणम् ॥

००६ आनन्दमयाधिकरणम् ॥

००७ अन्तराधिकरणम् ॥

००८ आकाशाधिकरणम् ॥

००९ प्राणाधिकरणम् ॥

०१० ज्योतिश्चरणाधिकरणम् ॥

०११ प्रतर्दनाधिकरणम् ॥

पाद २
अधिकरण १२-१८
सूत्र ३२-६३

०१२ सर्वत्र प्रसिद्ध्यधिकरणम् ॥

०१३ अत्त्राधिकरणम् ॥

०१४ गुहाप्रविष्टाधिकरणम् ॥

०१५ अन्तराधिकरणम् ॥

०१६ अन्तर्याम्यधिकरणम् ॥

०१७ अदृश्यत्वाधिकरणम् ॥

०१८ वैश्वानराधिकरणम् ॥

पाद ३
अधिकरण १९-३१
सूत्र ६४-१०६

०१९ द्युभ्वद्यधिकरणम् :
०२० भूमाधिकरणम् ॥

०२१ अक्षराधिकरणम् ॥

०२२ ईक्षतिकर्मव्यपदेशाधिकरणम् ॥

०२३ दहराधिकरणम् ॥

०२४ अनुकृत्याधिकरणम् ॥

०२५ प्रमिताधिकरणम् ॥

०२६ देवताधिकरणम् ॥

०२७ अपशूद्राधिकरणम् ॥

०२८ कम्पनाधिकरणम् ॥

०२९ ज्योतिराधिकरणम् ॥

०३० अर्थान्तरत्वदिव्यापदेशाधिकरणम् ॥

०३१ सुषुप्त्युत्क्रान्त्यधिकरणम् ॥

पाद ४
अधिकरण ३२-३९
सूत्र १०७-१३४

०३२ अनुमानिकाधिकरणम् ॥

०३३ चमसाधिकरणम् ॥

०३४ सङ्ख्योपसङ्ग्रहाधिकरणम् ॥

०३५ करणत्वाधिकरणम् ॥

०३६ बालक्यधिकरणम् ॥

०३७ वाक्यान्वयाधिकरणम् ॥

०३८ प्रकृत्यधिकरणम् ॥

०३९ सर्वव्याख्यानाधिकरणम् ॥

२ अविरोध

अध्यायः । अधिकरण ४७ सूत्राणि १५७

| | | |
|---|---|---|
| पाद १ | ४०-५२ | १३५-१७१ |
| पाद २ | ५३-६० | १७२-२१६ |
| पाद ३ | ६१-७७ | २१७-२६९ |
| पाद ४ | ७८-८६ | २७०-२९१ |

अविरोध अध्याय २
पाद १
अधिकरण ४०-५२
सूत्र १३५-१७१

०४० स्मृत्यधिकरणम् ॥

०४१ योगप्रत्युक्त्यधिकरणम् ॥

०४२ न विलक्षणत्वाधिकरणम् ॥

०४३ शिष्टपरिग्रहाधिकरणम् ॥

०४४ भोक्त्रपत्त्यधिकरणम् ॥

०४५ आरम्भनाधिकरणम् ॥

०४६ इतरव्यपदेशाधिकरणम् ॥

०४७ उपसंहारदर्शनाधिकरणम् ॥

०४८ कृत्स्नप्रसक्त्यधिकरणम् ॥

०४९ सर्वोपेताधिकरणम् ॥

०५० प्रयोजनत्वाधिकरणम् ॥

०५१ वैषम्यनैर्घृण्याधिकरणम् ॥

०५२ सर्वधर्मोपपत्त्यधिकरणम् ॥

पाद २
अधिकरण ५३-६०
सूत्र १७२-२१६

०५३ रचनानुपपत्त्यधिकरणम् ॥

०५४ महद्दीर्घाधिकरणम् ॥

०५५ परमाणुजगदकरणत्वाधिकरणम् ॥

०५६ समुदयाधिकरणम् ॥

०५७ नाभावाधिकरणम् ॥

०५८ एकस्मिन्नसम्भवाधिकरणम् ॥

०५९ पत्यधिकरणम् ॥

०६० उत्पत्त्यसम्भवाधिकरणम् ॥

पाद ३
अधिकरण ६१-७७
सूत्र २१७-२६९

०६१ वियदधिकरणम् ॥

०६२ मातरिश्वाधिकरणम् ॥

०६३ असम्भवाधिकरणम् ॥

०६४ तेजोऽधिकरणम् ॥

०६५ आबधिकरणम् ॥

०६६ पृथिव्यधिकरणम् ॥

०६७ तदभिध्यानाधिकरणम् ॥

०६८ विपर्ययाधिकरणम् ॥

०६९ अन्तरविज्ञानाधिकरणम् ॥

०७० चराचरव्यपाश्रयाधिकरणम् ॥

०७१ आत्माधिकरणम् ॥

०७२ ज्ञाधिकरणम् ॥ )
०७३ उत्क्रान्तिगत्यधिकरणम् ॥

०७४ कर्तृ-अधिकरणम् ॥

०७५ तक्षाधिकरणम् ॥

०७६ परयत्ताधिकरणम् ॥

०७७ अंशाधिकरणम् ॥

पाद ४
अधिकरण ७८-८६
सूत्र २७०-२९१

०७८ प्राणोत्पत्त्यधिकरणम् ॥

०७९ सप्तगत्यधिकरणम् ॥

०८० प्राणाणुत्वाधिकरणम् ॥

०८१ प्राणश्रैष्ठ्याधिकरणम् ॥

०८२ वायुक्रियाधिकरणम् ॥

०८३ श्रेष्ठाणुत्वाधिकरणम् ॥

०८४ ज्योतिराद्याधिकरणम् ॥

०८५ इन्द्रियाधिकरणम् ॥

०८६ संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥

३ साधन
अध्ययः । अधिकरण ६७ सूत्राणि १८६

| | | |
|---|---|---|
| पाद १ | ८७-९२ | २९२-३१८ |
| पाद २ | ९३-१०० | ३१९-३५९ |
| पाद ३ | १०१-१३६ | ३६०-४२६ |
| पाद ४ | १३७-१५३ | ४२७-४७७ |

साधन अध्याय ३
पाद १
अधिकरण ८७-९२
सूत्र २९२-३१८

०८७ तदन्तरप्रतिपत्त्यधिकरणम् ॥

०८८ कृतत्ययाधिकरणम् ॥

०८९ अनिष्टादिकार्याधिकरणम् ॥

०९० सभाव्यपत्त्यधिकरणम् ॥

०९१ नातिचिराधिकरणम् ॥

०९२ अन्यधिष्ठिताधिकरणम् ॥

पाद २
अधिकरण ९३-१००
सूत्र ३१९-३५९

०९३ सन्ध्यधिकरणम् ॥

०९४ तदभावाधिकरणम् ॥

०९५ कर्मानुस्मृतिशब्दविध्यधिकरणम् ॥

०९६ मुग्धेऽर्धसम्पत्त्यधिकरणम् ॥

०९७ उभयलिङ्गाधिकरणम् ॥

०९८ प्रकृतैतवत्त्वाधिकरणम् ॥

०९९ पराधिकरणम् ॥

१०० फलाधिकरणम् ॥

पाद ३
अधिकरण १०१-१३६
सूत्र ३६०-४२५

१०१ सर्ववेदान्तप्रत्ययाधिकरणम् ॥

१०२ उपसंहाराधिकरणम् ॥

१०३ अन्यथत्वाधिकरणम् ॥

१०४ व्याप्त्यधिकरणम् ॥

१०५ सर्वभेदाधिकरणम् ॥

१०६ आनन्दाद्यधिकरणम् ॥

१०७ अध्यानायाधिकरणम् ॥

१०८ आत्मगृहीत्यधिकरणम् ॥

१०९ कार्याख्यानाधिकरणम् ॥

११० समानाधिकरणम् ॥

१११ सम्बन्धाधिकरणम् ॥

११२ सम्भृत्याधिकरणम् ॥

११३ पुरुषविद्याधिकरणम् ॥

११४ वेधाद्यधिकरणम् ॥

११५ हान्याधिकरणम् ॥

११६ सम्परायाधिकरणम् ॥

११७ गतेरर्थवत्त्वाधिकरणम् ॥

११८ अनियमाधिकरणम् ॥

११९ यावदधिकाराधिकरणम् ॥

१२० अक्षरधियाधिकरणम् ॥

१२१ इयदधिकरणम् ॥

१२२ अन्तरत्वाधिकरणम् ॥

१२३ व्यतिहाराधिकरणम् ॥

१२४ सत्याद्याधिकरणम् ॥

१२५ कामाद्यधिकरणम् ॥

१२६ आदराधिकरणम् ॥

१२७ तन्निर्धारणाधिकरणम् ॥

१२८ प्रदानाधिकरणम् ॥

१२९ लिङ्गभूयस्त्वाधिकरणम् ॥

१३० ऐकात्म्याधिकरणम् ॥

१३१ अङ्गावबद्धाधिकरणम् ॥

१३२ भूमज्यायस्त्वाधिकरणम् ॥

१३३ शब्दादिभेदाधिकरणम् ॥

१३४ विकल्पाधिकरणम् ॥

१३५ काम्याधिकरणम् ॥

१३६ यथाश्रयभवाधिकरणम् ॥

| | |
|---|---|
| पाद | ४ |
| अधिकरण | १३७-१५३ |
| सूत्र | ४२६-४७७ |

१३७ पुरुषार्थाधिकरणम् ॥

१३८ परामर्शाधिकरणम् ॥

१३९ स्तुतिमात्राधिकरणम् ॥

१४० पारिप्लवाधिकरणम् ॥

१४१ अग्नीन्धनाद्यधिकरणम् ॥

१४२ सर्वापेक्षाधिकरणम् ॥

१४३ सर्वान्नानुमत्यधिकरणम् ॥

१४४ आश्रमकर्माधिकरणम् ॥

१४५ विधुराधिकरणम् ॥

१४६ तद्भूताधिकरणम् ॥

१४७ अधिकाराधिकरणम् ॥

१४८ बहिराधिकरणम् ॥

१४९ स्वाम्यधिकरणम् ॥

१५० सहकार्यन्तरविध्यधिकरणम् ॥

१५१ अनाविष्कराधिकरणम् ॥

१५२ ऐहिकाधिकरणम् ॥

१५३ मुक्तिफलाधिकरणम् ॥

४ फल
अध्यायः । अधिकरण ३८ सूत्राणि ७८

| | | |
|---|---|---|
| पाद १ | १५४-१६७ | ४७८-४९६ |
| पाद २ | १६८- १७८ | ४९७-५१७ |
| पाद ३ | १७९-१८४ | ५१८-५३३ |
| पाद ४ | १८५-१९१ | ५३४-५५५ |

फल अध्यय ४
पाद १
अधिकरण १५४-१६७
सूत्र ४७८-४९६

१५४ आवृत्त्यधिकरणम् ॥

१५५ आत्मत्वोपासनाधिकरणम् ॥

१५६ प्रतिकाधिकरणम् ॥

१५७ ब्रह्मदृष्ट्यधिकरणम् ॥

१५८ आदित्यादिमतयाधिकरणम् ॥

१५९ आसीनाधिकरणम् ॥

१६० एकाग्रताधिकरणम् ॥

१६१ आप्रायणाधिकरणम् ॥

१६२ तदधिगमाधिकरणम् ॥

१६३ इतरसंश्लेषाधिकरणम् ॥

१६४ अनारब्धाधिकरणम् ॥

१६५ अग्निहोत्राद्यधिकरणम् ॥

१६६ विद्याज्ञानसाधनाधिकरणम् ॥

१६७ इतरक्षपनाधिकरणम् ॥

पाद २
अधिकरण १६८-१७८
सूत्र ४९७-५१७

१६८ वागधिकरणम्
१६९ मनोऽधिकरणम्
१७० अध्यक्षाधिकरणम् ॥

१७१ असृत्युपक्रमाधिकरणम्
१७२ संसारव्यपदेशाधिकरणम् ॥

१७३ प्रतिषेधाधिकरणम् ॥

१७४ वागादिलयाधिकरणम् ॥

१७५ अविभागाधिकरणम् ॥

१७६ तदोकोऽधिकरणम् ॥

१७७ रश्म्यधिकरणम् ॥

१७८ दक्षिणायनाधिकरणम् ॥

पाद ३

अधिकरण १७९-१८४
सूत्र ५१८-५३३

१७९ अर्चिराद्यधिकरणम् ॥

१८० वय्वधिकरणम् ॥

१८१ तदिदधिकरणम् ॥

१८२ अतिवाहिकाधिकरणम् ॥

१८३ कार्याधिकरणम् ॥

१८४ अप्रतिकलम्बनाधिकरणम् ॥

पाद ४
अधिकरण १८५-१९१
सूत्र ५३४-५५५

१८५ सम्पद्याविर्भावाधिकरणम् ॥

१८६ अविभागेन दृष्टत्वाधिकरणम् ॥

१८७ ब्रह्माधिकरणम् ॥

१८८ सङ्कल्पाधिकरणम् ॥

१८९ अभावाधिकरणम् ॥

१९० प्रदीपाधिकरणम् ॥

१९१ जगद्व्यापाराधिकरणम् ॥

अध्याय १ समन्वय
पाद १
अधिकरण १-११
सूत्र १-३१

अधिकरण ००१ जिज्ञासाधिकरणम् ॥

सूत्र ००१ अथातो ब्रह्मजिज्ञासा

अधिकरण ००२ जन्माद्यधिकरणम् ॥

सूत्र ००२ जन्माद्यस्य यतः ॥

अधिकरण ००३ शास्त्रयोनित्वाधिकरणम् ॥

सूत्र ००३ शास्त्रयोनित्त्वात् ॥

अधिकरण ००४ समन्वयाधिकरणम् ॥

सूत्र ००४ तत्तु समन्वयात् ॥

अधिकरण ००५ ईक्षत्याद्यधिकरणम् ॥

सूत्र ००५ ईक्षतेर्नाशब्दम् ।
००६ गौणश्चेन्नात्मशब्दात् ।
००७ तन्निष्ठस्य मोक्षोपदेशात् ।
००८ हेयत्वावचनाच्च ।
००९ स्वाप्ययात् ।
०१० गतिसामान्यात् ।
०११ श्रुतत्त्वाच्च ॥

अधिकरण ००६ आनन्दमयाधिकरणम् ॥

सूत्र ०१२ आनन्दमयोऽभ्यासात् ।
०१३ विकारशब्दान्नेति चेन्न प्राचुर्यात् ।
०१४ तद्धेतुव्यपदेशाच्च ।
०१५ मान्त्रवर्णिकमेव च गीयते ।
०१६ नेतरोऽनुपपत्तेः ।
०१७ भेदव्यपदेशाच्च ।
०१८ कामाच्च नानुमानापेक्षा ।
०१९ अस्मिन्नस्य च तद्योगं शास्ति ॥

अधिकरण ००७ अन्तराधिकरणम् ॥

सूत्र ०२० अन्तस्तद्धर्मोपदेशात् ।
०२१ भेदव्यपदेशाच्चान्यः ॥

अधिकरण ००८ आकाशाधिकरणम् ॥

सूत्र ०२२ आकाशस्तल्लिङ्गात् ॥

अधिकरण ००९ प्राणाधिकरणम् ॥

सूत्र ०२३ अत एव प्राणः ॥

अधिकरण ०१० ज्योतिश्चरणाधिकरणम् ॥

सूत्र ०२४ ज्योतिश्चरणाभिधानात् ।
०२५ छन्दोऽभिधानान्नेति चेन्न तथा
चेतोऽर्पणनिगदात्तथा हि दर्शनम् ।
०२६ भूतादिपादव्यपदेशोपपत्तेश्चैवम् ।

०२७ उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥

अधिकरण ०११ प्रतर्दनाधिकरणम् ॥

सूत्र ०२८ प्राणस्तथानुगमात् ।
०२९ न वक्तुरात्मोपदेशादिति
चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् ।
०३० शास्त्रदृष्ट्या तूपदेशो वामदेववत्
०३१ जीवमुख्यप्राणलिङ्गान्नेति
चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥

अध्याय १
पाद २
अधिकरण १२-१८
सूत्र ३२-६३

अधिकरण ०१२ सर्वत्र प्रसिद्ध्यधिकरणम् ॥

सूत्र ०३२ सर्वत्र प्रसिद्धोपदेशात् ।
०३३ विवक्षितगुणोपपत्तेश्च ।
०३४ अनुपपत्तेस्तु न शारीरः ।
०३५ कर्मकर्तृव्यपदेशाच्च ।
०३६ शब्दविशेषात् ।
०३७ स्मृतेश्च ।
०३८ अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न
निचाय्यत्वादेवं व्योमवच्च ।
०३९ सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॥

अधिकरण ०१३ अत्ताधिकरणम् ॥

सूत्र ०४० अत्ता चराचरग्रहणात् ।
०४१ प्रकरणाच्च ॥

अधिकरण ०१४ गुहाप्रविष्टाधिकरणम् ॥

सूत्र ०४२ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ।
०४३ विशेषणाच्च ।

अधिकरण ०१५ अन्तराधिकरणम् ॥

सूत्र ०४४ अन्तर उपपत्तेः ।
०४५ स्थानादिव्यपदेशाच्च ।
०४६ सुखविशिष्टाभिधानादेव च ।

०४७ श्रुतोपनिषत्कगत्यभिधानाच्च ।
०४८ अनवस्थितेरसम्भवाच्च नेतरः ॥

अधिकरण ०१६ अन्तर्याम्यधिकरणम् ॥

सूत्र ०४९ अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ।
०५० न च स्मार्तमतद्धर्माभिलापात् ।
०५१ शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥

अधिकरण ०१७ अदृश्यत्वाधिकरणम् ॥

सूत्र ०५२ अदृश्यत्वादिगुणको धर्मोक्तेः ।
०५३ विशेषणभेदव्यपदेशाभ्यां च नेतरौ ।
०५४ रूपोपन्यासाच्च ।

अधिकरण ०१८ वैश्वानराधिकरणम् ॥

सूत्र ०५५ वैश्वानरः साधारणशब्दविशेषात् ।
०५६ स्मर्यमाणमनुमानं स्यादिति ।
०५७ शब्दादिभ्योऽन्तःप्रतिष्ठाच्च नेति चेन्न तथा ।
दृष्ट्युपदेशादसम्भवात्पुरुषमपि चैनमधीयते ।
०५८ अत एव न देवता भूतं च ।
०५९ साक्षादप्यविरोधं जैमिनिः ।
०६० अभिव्यक्तेरित्याश्मरथ्यः ।
०६१ अनुस्मृतेर्बादरिः ।
०६२ सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ।
०६३ आमनन्ति चैनमस्मिन् ॥

अध्याय १
पाद ३
अधिकरण १९-३१
सूत्र ६४-१०६

अधिकरण ०१९ द्युभ्वाद्यधिकरणम् ॥

सूत्र ०६४ द्युभ्वाद्यायतनं स्वशब्दात् ।
०६५ मुक्तोपसृप्यव्यपदेशात् ।
०६६ नानुमानमतच्छब्दात् ।
०६७ प्राणभृच्च ।
०६८ भेदव्यपदेशात् ।
०६९ प्रकरणात् ।

०७० स्थित्यदनाभ्यां च ।

अधिकरण ०२० भौमाधिकरणम् ॥

सूत्र ०७१ भूमा सम्प्रसादादध्युपदेशात् ।
०७२ धर्मोपपत्तेश्च ॥

अधिकरण ०२१ अक्षराधिकरणम् ॥

सूत्र ०७३ अक्षरमम्बरान्तधृतेः
०७४ सा च प्रशासनात् ।
०७५ अन्यभावव्यावृत्तेश्च ॥

अधिकरण ०२२ ईक्षतिकर्मव्यपदेशाधिकरणम् ॥

सूत्र ०७६ ईक्षतिकर्मव्यपदेशात् सः ॥

अधिकरण ०२३ दहराधिकरणम् ॥

सूत्र ०७७ दहर उत्तरेभ्यः ।
०७८ गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च ।
०७९ धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ।
०८० प्रसिद्धेश्च ।
०८१ इतरपरामर्शात् स इति चेन्नासम्भवात् ।
०८२ उत्तराच्चेदाविर्भूतस्वरूपस्तु ।
०८३ अन्यार्थश्च परामर्शः ।
०८४ अल्पश्रुतेरिति चेत्तदुक्तम् ॥

अधिकरण ०२४ अनुकृत्यधिकरणम् ॥

सूत्र ०८५ अनुकृतेस्तस्य च ।
०८६ अपि च स्मर्यते ॥

अधिकरण ०२५ प्रमिताधिकरणम् ॥

सूत्र ०८७ शब्दादेव प्रमितः ।
०८८ हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥

अधिकरण ०२६ देवताधिकरणम् ॥

सूत्र ०८९ तदुपर्यपि बादरायणः सम्भवात् ।
०९० विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ।
०९१ शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् ।
०९२ अत एव च नित्यत्वम् ।

०९३ समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च ।
०९४ मध्वादिष्वसम्भवादनधिकारं जैमिनिः ।
०९५ ज्योतिषि भावाच्च ।
०९६ भावं तु बादरायणोऽस्ति हि ॥

अधिकरण ०२७ अपशूद्राधिकरणम् ॥

सूत्र ०९७ शुगस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते हि ।
०९८ क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ।
०९९ संस्कारपरामर्शात्तदभावाभिलापाच्च ।
१०० तदभावनिर्धारणे च प्रवृत्तेः ।
१०१ श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च ॥

अधिकरण ०२८ कम्पनाधिकरणम् ॥

सूत्र १०२ कम्पनात् ॥

अधिकरण ०२९ ज्योतिरधिकरणम् ॥

सूत्र १०३ ज्योतिर्दर्शनात् ॥

अधिकरण ०३० अर्थान्तरत्वादिव्यपदेसाधिकरणम् ॥

सूत्र १०४ आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥

अधिकरण ०३१ सुषुप्त्युत्क्रान्त्यधिकरणम् ॥

सूत्र १०५ सुषुप्त्युत्क्रान्त्योर्भेदेन ।
१०६ पत्यादिशब्देभ्यः ॥

अध्याय १
पाद ४
अधिकरण ३२-३९
सूत्र १०७-१३४

अधिकरण ०३२ अनुमानिकाधिकरणम् ॥

सूत्र १०७ आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ।
१०८ सूक्ष्मं तु तदर्हत्वात् ।
१०९ तदधीनत्वादर्थवत् ।
११० ज्ञेयत्वावचनाच्च ।
१११ वदतीति चेन्न प्राज्ञो हि प्रकरणात् ।

११२ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ।
११३ महद्वच्च ॥

अधिकरण ०३३ चमसाधिकरणम् ॥

सूत्र ११४ चमसवदविशेषात् ।
११५ ज्योतिरुपक्रमा तु तथा ह्यधीयत एके ।
११६ कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥

अधिकरण ०३४ सङ्ख्योपसङ्ग्रहाधिकरणम् ॥

सूत्र ११७ न सङ्ख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च ।
११८ प्राणादयो वाक्यशेषात् ।
११९ ज्योतिषैकेषामसत्यन्ने ॥

अधिकरण ०३५ कारणत्वाधिकरणम् ॥

सूत्र १२० कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ।
१२१ समाकर्षात् ॥

अधिकरण ०३६ बालक्यधिकरणम् ॥

सूत्र १२२ जगद्वाचित्वात् ।
१२३ जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् ।
१२४ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥

अधिकरण ०३७ वाक्यान्वयाधिकरणम् ॥

सूत्र १२५ वाक्यान्वयात् ।
१२६ प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ।
१२७ उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः ।
१२८ अवस्थितेरिति काशकृत्स्नः ॥

अधिकरण ०३८ प्रकृत्यधिकरणम् ॥

सूत्र १२९ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ।
१३० अभिध्योपदेशाच्च ।
१३१ साक्षाच्चोभयाम्नानात् ।
१३२ आत्मकृतेः परिणामात् ।
१३३ योनिश्च हि गीयते ॥

अधिकरण ०३९ सर्वव्याख्यानाधिकरणम् ॥

सूत्र १३४ एतेन सर्वे व्याख्याता व्याख्याताः ॥

अध्याय २ अविरोध
पाद १
अधिकरण ४०-५२
सूत्र १३५-१७१

अधिकरण ०४० स्मृत्यधिकरणम् ॥

सूत्र १३५ स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ।
१३६ इतरेषां चानुपलब्धेः ॥

अधिकरण ०४१ योगप्रत्युक्त्याधिकरणम् ॥

सूत्र १३७ एतेन योगः प्रत्युक्तः ॥

अधिकरण ०४२ न विलक्षणत्वाधिकरणम् ॥

सूत्र १३८ न विलक्षणत्वादस्य तथात्वं च शब्दात् ।
१३९ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ।
१४० दृश्यते तु ।
१४१ असदिति चेन्न प्रतिषेधमात्रत्वात् ।
१४२ अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ।
१४३ न तु दृष्टान्तभावात् ।
१४४ स्वपक्षदोषाच्च ।
१४५ तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यविमोक्षप्रसङ्गः ॥

अधिकरण ०४३ शिष्टपरिग्रहाधिकरणम् ॥।

सूत्र १४६ एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥

अधिकरण ०४४ भोक्त्रापत्त्यधिकरणम् ॥

१४७ भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत् ॥

अधिकरण ०४५ आरम्भणाधिकरणम् ॥

सूत्र १४८ तदनन्यत्वमारम्भणशब्दादिभ्यः ।
१४९ भावे चोपलब्धेः ।
१५० सत्त्वाच्चावरस्य ।
१५१ असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् ।
१५२ युक्तेः शब्दान्तराच्च ।
१५३ पटवच्च ।

१५४ यथा च प्राणादि ।

अधिकरण ०४६ इतरव्यपदेशाधिकरणम् ॥

सूत्र १५५ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ।
१५६ अधिकं तु भेदनिर्देशात् ।
१५७ अश्मादिवच्च तदनुपपत्तिः ॥

अधिकरण ०४७ उपसंहारदर्शनाधिकरणम् ॥

सूत्र १५८ उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ।
१५९ देवादिवदपि लोके ॥

अधिकरण ०४८ कृत्स्नप्रसक्त्यधिकरणम् ॥

सूत्र १६० कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ।
१६१ श्रुतेस्तु शब्दमूलत्वात् ।
१६२ आत्मनि चैवं विचित्राश्च हि ।
१६३ स्वपक्षदोषाच्च ॥

अधिकरण ०४९ सर्वोपेताधिकरणम् ॥

सूत्र १६४ सर्वोपेता च तद्दर्शनात् ।
१६५ विकरणत्वान्नेति चेत्तदुक्तम् ॥

अधिकरण ०५० प्रयोजनत्वाधिकरणम् ॥

सूत्र १६६ न प्रयोजनवत्त्वात् ।
१६७ लोकवत्तु लीलाकैवल्यम् ॥

अधिकरण ०५१ वैषम्यनैर्घृन्याधिकरणम् ॥

सूत्र १६८ वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथा हि दर्शयति ।
१६९ न कर्माविभागादिति चेन्नानादित्वात् ।
१७० उपपद्यते चाप्युपलभ्यते च ।
१७१ सर्वधर्मोपपत्तेश्च ॥

अध्याय २ अविरोध
पाद २
अधिकरण ५३-६०
सूत्र १७२-२१६

अधिकरण ०५३ रचनाऽनुपपत्त्यधिकरणम् ॥

सूत्र १७२ रचनाऽनुपपत्तेश्च नानुमानम् ।

१७३ प्रवृत्तेश्च ।
१७४ पयोऽम्बुवच्चेत् तत्रापि ।
१७५ व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ।
१७६ अन्यत्राभावाच्च न तृणादिवत् ।
१७७ अभ्युपगमेऽप्यर्थाभावात् ।
१७८ पुरुषाश्मवदिति चेत्तथाऽपि ।
१७९ अङ्गित्वानुपपत्तेश्च ।
१८० अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ।
१८१ विप्रतिषेधाच्चासमञ्जसम् ॥

अधिकरण ०५४ महद्दीर्घाधिकरणम् ॥

सूत्र १८२ महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥

अधिकरण ०५५ परमाणुजगदाकारणत्वाधिकरणम् ॥

सूत्र १८३ उभयथाऽपि न कर्मातस्तदभावः ।
१८४ समवायाभ्युपगमाच्च साम्यादनवस्थितेः ।
१८५ नित्यमेव च भावात् ।
१८६ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ।
१८७ उभयथा च दोषात् ।
१८८ अपरिग्रहाच्चात्यन्तमनपेक्षा ॥

अधिकरण ०५६ समुदायाधिकरणम् ॥

सूत्र १८९ समुदाय उभयहेतुकेऽपि तदप्राप्तिः ।
१९० इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ।
१९१ उत्तरोत्पादे च पूर्वनिरोधात् ।
१९२ असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ।
१९३ प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधाप्राप्तिरविच्छेदात् ।
१९४ उभयथा च दोषात् ।
१९५ आकाशे चाविशेषात् ।
१९६ अनुस्मृतेश्च ।
१९७ नासतोऽदृष्टत्वात् ।
१९८ उदासीनानामपि चैवं सिद्धिः ॥

अधिकरण ०५७ नाभावाधिकरणम् ॥

सूत्र १९९ नाभाव उपलब्धेः ।
२०० वैधर्म्याच्च न स्वप्नादिवत् ।
२०१ न भावोऽनुपलब्धेः ।

२०२ क्षणिकत्वाच्च ।
२०३ सर्वथाऽनुपपत्तेश्च ॥

अधिकरण ०५८ एकस्मिन्नसम्भवाधिकरणम् ॥

सूत्र २०४ नैकस्मिन्नसम्भवात् ।
२०५ एवञ्चात्माऽकार्त्स्न्यम् ।
२०६ न च पर्यायादप्यविरोधो विकारादिभ्यः ।
२०७ अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥

अधिकरण ०५९ पत्यधिकरणम् ॥

सूत्र २०८ पत्युरसामञ्जस्यात् ।
२०९ सम्बन्धानुपपत्तेश्च ।
२१० अधिष्ठानानुपपत्तेश्च ।
२११ करणवच्चेन्न भोगादिभ्यः ।
२१२ अन्तवत्त्वमसर्वज्ञता वा ॥

अधिकरण ०६० उत्पत्त्यसम्भवाधिकरणम् ॥

सूत्र २१३ उत्पत्त्यसम्भवात् ।
२१४ न च कर्तुः करणम् ॥
२१५ विज्ञानादिभावे वा तदप्रतिषेधः ।
२१६ विप्रतिषेधाच्च ॥

अध्याय २
पाद ३
अधिकरण ६१-७७
सूत्र २१७-२६९

अधिकरण ०६१ वियदधिकरणम् ॥

सूत्र २१७ न वियदश्रुतेः ।
२१८ अस्ति तु ।
२१९ गौण्यसम्भवात् ।
२२० शब्दाच्च ।
२२१ स्याच्चैकस्य ब्रह्मशब्दवत् ।
२२२ प्रतिज्ञाऽहानिरव्यतिरेकाच्छब्देभ्यः ।
२२३ यावद्विकारं तु विभागो लोकवत् ॥

अधिकरण ०६२ मातरिश्वाधिकरणम् ॥

सूत्र २२४ एतेन मातरिश्वा व्याख्यातः ॥

अधिकरण ०६३ असम्भवाधिकरणम् ॥

सूत्र २२५ असम्भवस्तु सतोऽनुपपत्तेः ॥

अधिकरण ०६४ तेजोऽधिकरणम् ॥

सूत्र २२६ तेजोऽतस्तथा ह्याह ॥

अधिकरण ०६५ आबधिकरणम् ॥

सूत्र २२७ आपः ॥

अधिकरण ०६६ पृथिव्यधिकरणम् ॥

सूत्र २२८ पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥

अधिकरण ०६७ तदभिध्यानाधिकरणम् ॥

सूत्र २२९ तदभिध्यानादेव तु तल्लिङ्गात्सः ॥

अधिकरण ०६८ विपर्ययाधिकरणम् ॥

सूत्र २३० विपर्ययेण तु क्रमोऽत उपपद्यते च ।

अधिकरण ०६९ अन्तराविज्ञानाधिकरणम् ॥

सूत्र २३१ अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ।

अधिकरण ०७० चराचरव्यपाश्रयाधिकरणम् ॥

सूत्र २३२ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो
भाक्तस्तद्भावभावित्वात् ॥

अधिकरण ०७१ आत्माधिकरणम् ॥

सूत्र २३३ नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ॥

अधिकरण ०७२ ज्ञाधिकरणम् ॥

सूत्र २३४ ज्ञोऽत एव ॥

अधिकरण ०७३ उत्क्रान्तिगत्यधिकरणम् ॥

सूत्र २३५ उत्क्रान्तिगत्यागतीनाम् ।
२३६ स्वात्मना चोत्तरयोः ।
२३७ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ।
२३८ स्वशब्दोन्मानाभ्यां च ।
२३९ अविरोधश्चन्दनवत् ।

२४० अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ।
२४१ गुणाद्वा लोकवत् ।
२४२ व्यतिरेको गन्धवत् ।
२४३ तथा च दर्शयति ।
२४४ पृथगुपदेशात् ।
२४५ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ।
२४६ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ।
२४७ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ।
२४८ नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा ॥

अधिकरण ०७४ कर्ताधिकरणम् ॥

सूत्र २४९ कर्ता शास्त्रार्थवत्त्वात् ।
२५० विहारोपदेशात् ।
२५१ उपादानात् ।
२५२ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ।
२५३ उपलब्धिवदनियमः ।
२५४ शक्तिविपर्ययात् ।
२५५ समाध्यभावाच्च ॥

अधिकरण ०७५ तक्षाधिकरणम् ॥

सूत्र २५६ यथा च तक्षोभयथा ॥

अधिकरण ०७६ परायत्ताधिकरणम् ॥

सूत्र २५७ परात्तु तच्छ्रुतेः ।
२५८ कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥

अधिकरण ०७७ अंशाधिकरणम् ॥

सूत्र २५९ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ।
२६० मन्त्रवर्णाच्च ।
२६१ अपि च स्मर्यते ।
२६२ प्रकाशादिवन्नैवं परः ।
२६३ स्मरन्ति च ।
२६४ अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ।
२६५ असन्ततेश्चाव्यतिकरः ।

२६६ आभास एव च ।
२६७ अदृष्टानियमात् ।
२६८ अभिसन्ध्यादिष्वपि चैवम् ।
२६९ प्रदेशादिति चेन्नान्तर्भावात् ॥

अध्याय २
पाद ४
अधिकरण ७८-८६
सूत्र २७०-२९१

अधिकरण ०७८ प्राणोत्पत्त्यधिकरणम् ॥

सूत्र २७० तथा प्राणाः ।
२७१ गौण्यसम्भवात् ।
२७२ तत्प्राक्श्रुतेश्च ।
२७३ तत्पूर्वकत्वाद्वाचः ॥

अधिकरण ०७९ सप्तगत्यधिकरणम् ॥

सूत्र २७४ सप्त गतेर्विशेषितत्वाच्च ।
२७५ हस्तादयस्तु स्थितेऽतो नैवम् ॥

अधिकरण ०८० प्राणाणुत्वाधिकरणम् ॥

सूत्र २७६ अणवश्च ।

अधिकरण ०८१ प्राणश्रैष्ठ्याधिकरणम् ॥

सूत्र २७७ श्रेष्ठश्च ॥

अधिकरण ०८२ वायुक्रियाधिकरणम् ॥

सूत्र २७८ न वायुक्रिये पृथगुपदेशात् ।
२७९ चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ।
२८० अकरणत्वाच्च न दोषस्तथा हि दर्शयति ।
२८१ पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥

अधिकरण ०८३ श्रेष्ठाणुत्वाधिकरणम् ॥

सूत्र २८२ अणुश्च ॥

अधिकरण ०८४ ज्योतिराद्यधिकरणम् ॥

सूत्र २८३ ज्योतिराद्यधिष्ठानं तु तदामननात् ।
२८४ प्राणवता शब्दात् ।

२८५ तस्य च नित्यत्वात् ।

अधिकरण ०८५ इन्द्रियाधिकरणम् ॥

सूत्र २८६ त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ।
२८७ भेदश्रुतेः ।
२८८ वैलक्षण्याच्च ॥

अधिकरण ०८६ सम्ज्ञामुअर्तिक्लृप्त्यधिकरणम् ॥

सूत्र २८९ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ।
२९० मांसादि भौमं यथाशब्दमितरयोश्च ।
२९१ वैशेष्यात्तु तद्वादस्तद्वादः ॥

अध्ययः ३ साधन
पाद १
अधिकरण ८७-९२
सूत्राणि २९२-३१८

अधिकरण ०८७ तदन्तरप्रतिपत्त्यधिकरणम् ॥

सूत्र २९२ तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम् ।
२९३ त्र्यात्मकत्वात्तु भूयस्त्वात् ।
२९४ प्राणगतेश्च ।
२९५ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ।
२९६ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ।
२९७ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ।
२९८ भाक्तं वाऽनात्मवित्त्वात्तथा हि दर्शयति ॥

अधिकरण ०८८ कृतत्ययाधिकरणम् ॥

सूत्र २९९ कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ।
३०० चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः ।
३०१ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ।
३०२ सुकृतदुष्कृते एवेति तु बादरिः ॥

अधिकरण ०८९ अनिष्टदिकार्याधिकरणम् ॥

सूत्र ३०३ अनिष्टादिकारिणामपि च श्रुतम् ।
३०४ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्
३०५ स्मरन्ति च ।

३०६ अपि च सप्त ।
३०७ तत्रापि च तद्व्यापारादविरोधः ।
३०८ विद्याकर्मणोरिति तु प्रकृतत्वात् ।
३०९ न तृतीये तथोपलब्धः ।
३१० स्मर्यतेऽपि च लोके ।
३११ दर्शनाच्च ।
३१२ तृतीयशब्दावरोधः संशोकजस्य ॥

अधिकरण ०९० साभाव्यापत्त्यधिकरणम् ॥

सूत्र ३१३ साभाव्यापत्तिरुपपत्तेः ॥

अधिकरण ०९१ नातिचिराधिकरणम् ॥

सूत्र ३१४ नातिचिरेण विशेषात् ॥

अधिकरण ०९२ अन्याधिष्ठिताधिकरणम् ॥

सूत्र ३१५ अन्याधिष्ठतेषु पूर्ववदभिलापात् ।
३१६ अशुद्धमिति चेन्न शब्दात् ।
३१७ रेतःसिग्योगोऽथ ।
३१८ योनेः शरीरम् ॥

अध्ययः ३ साधन
पाद २
अधिकरण ९३-१००
सूत्राणि ३१९-३५९

अधिकरण ०९३ सन्ध्याधिकरणम् ॥

सूत्र ३१९ सन्ध्ये सृष्टिराह हि ।
३२० निर्मातारं चैके पुत्रादयश्च ।
३२१ मायामात्रं तु कार्त्स्न्यानभिव्यक्तस्वरूपत्वात् ।
३२२ सूचकश्च हि श्रुतेराचक्षते च तद्विदः ।
३२३ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ।
३२४ देहयोगाद्वा सोऽपि ॥

अधिकरण ०९४ तदभावाधिकरणम् ॥

सूत्र ३२५ तदभावो नाडीषु तच्छ्रुतेरात्मनि ह ।
३२६ अतः प्रबोधोऽस्मात् ॥

अधिकरण ०९५ कर्मानुस्मृतिशब्दविध्यधिकरणम् ॥

सूत्र ३२७ स एव च कर्मानुस्मृतिशब्दविधिभ्यः ॥

अधिकरण ०९६ मुग्धेऽर्धसम्पत्त्यधिकरणम् ॥

सूत्र ३२८ मुग्धेऽर्धसम्पत्तिः परिशेषात् ॥

अधिकरण ०९७ उभयलिङ्गाधिकरणम् ॥

सूत्र ३२९ न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ।
३३० न भेदादिति चेन्न प्रत्येकमतद्वचनात् ।
३३१ अपि चैवमेके ।
३३२ अरूपवदेव हि तत्प्रधानत्वात् ।
३३३ प्रकाशवच्चावैयर्थ्यात् ।
३३४ आह च तन्मात्रम् ।
३३५ दर्शयति चाथो अपि स्मर्यते ।
३३६ अत एव चोपमा सूर्यकादिवत् ।
३३७ अम्बुवदग्रहणात्तु न तथात्वम् ।
३३८ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ।
३३९ दर्शनाच्च ॥

अधिकरण ०९८ प्रकृतैतावत्त्वाधिकरणम् ॥

सूत्र ३४० प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ।
३४१ तदव्यक्तमाह हि ।
३४२ अपि संराधने प्रत्यक्षानुमानाभ्याम् ।
३४३ प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ।
३४४ अतोऽनन्तेन तथा हि लिङ्गम् ।
३४५ उभयव्यपदेशात्त्वहिकुण्डलवत् ।
३४६ प्रकाशाश्रयवद्वा तेजस्त्वात् ।
३४७ पूर्ववद्वा ।
३४८ प्रतिषेधाच्च ॥

अधिकरण ०९९ पराधिकरणम् ॥

सूत्र ३४९ परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ।
३५० सामान्यात्तु ।
३५१ बुद्ध्यर्थः पादवत् ।
३५२ स्थानविशेषात् प्रकाशादिवत् ।
३५३ उपपत्तेश्च ।
३५४ तथाऽन्यप्रतिषेधात् ।

३५५ अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥

अधिकरण १०० फलाधिकरणम् ॥

सूत्र ३५६ फलमत उपपत्तेः ।
३५७ श्रुतत्वाच्च ।
३५८ धर्मं जैमिनिरत एव ।
३५९ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥

अध्याय ३
पाद ३
अधिकरण १०१-१३६
सूत्र ३६०-४२०

अधिकरण १०१ सर्ववेदान्तप्रत्ययाधिकरणम् ॥

सूत्र ३६० सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ।
३६१ भेदान्नेति चेन्नैकस्यामपि ।
३६२ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ।
३६३ दर्शयति च ॥

अधिकरण १०२ उपसंहाराधिकरणम्
।सूत्र ३६४ उपसंहारोऽर्थाभेदाद्विधिशेषवत् समाने च ॥

अधिकरण १०३ अन्यथात्वाधिकरणम् ॥

सूत्र ३६५ अन्यथात्वं शब्दादिति चेन्नाविशेषात् ।
३६६ न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् ।
३६७ संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥

अधिकरण १०४ व्याप्त्यधिकरणम् ॥

सूत्र ३६८ व्याप्तेश्च समञ्जसम् ॥

अधिकरण १०५ सर्वभेदाधिकरणम् ॥

सूत्र ३६९ सर्वाभेदादन्यत्रेमे ॥

अधिकरण १०६ आनन्दाद्यधिकरणम् ॥

सूत्र ३७० आनन्दादयः प्रधानस्य ।
३७१ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ।
३७२ इतरे त्वर्थसामान्यात् ॥

| | |
|---|---|
| अधिकरण | १०७ आध्यानाधिकरणम् |
| ।सूत्र | ३७३ आध्यानाय प्रयोजनाभावात् |
| | ३७४ आत्मशब्दाच्च ॥ |
| अधिकरण | १०८ आत्मगृहित्यधिकरणम् ॥ |
| सूत्र | ३७५ आत्मगृहीतिरितरवदुत्तरात् । |
| | ३७६ अन्वयादिति चेत्स्यादवधारणात् ॥ |
| अधिकरण | १०९ कार्याख्यानाधिकरणम् ॥ |
| सूत्र | ३७७ कार्याख्यानादपूर्वम् ॥ |
| अधिकरण | ११० समानाधिकरणम् ॥ |
| सूत्र | ३७८ समान एवं चाभेदात् ॥ |
| अधिकरण | १११ सम्बन्धाधिकरणम् ॥ |
| सूत्र | ३७९ सम्बन्धादेवमन्यत्रापि । |
| | ३८० न वा विशेषात् । |
| | ३८१ दर्शयति च ॥ |
| अधिकरण | ११२ सम्भृत्यधिकरणम् ॥ |
| सूत्र | ३८२ सम्भृतिद्युव्याप्त्यपि चातः ॥ |
| अधिकरण | ११३ पुरुषविद्याधिकरणम् ॥ |
| सूत्र | ३८३ पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥ |
| अधिकरण | ११४ वेधाद्यधिकरणम् ॥ |
| सूत्र | ३८४ वेधाद्यर्थभेदात् । |
| अधिकरण | ११५ हान्यधिकरणम् ॥ |
| सूत्र | ३८५ हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् ॥ |
| अधिकरण | ११६ साम्परायाधिकरणम् ॥ |
| सूत्र | ३८६ साम्पराये तर्तव्याभावात्तथा ह्यन्ये । |
| | ३८७ छन्दत उभयाविरोधात् ॥ |
| अधिकरण | ११७ गतेरर्थवत्त्वाधिकरणम् ॥ |
| सूत्र | ३८८ गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः । |

३८९ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥

अधिकरण ११८ अनियमाधिकरणम् ॥

सूत्र ३९० अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ॥

अधिकरण ११९ यावदधिकाराधिकरणम् ॥

सूत्र ३९१ यावदधिकारमवस्थितिराधिकारिकाणाम् ॥

अधिकरण १२० अक्षरधियाधिकरणम् ॥

सूत्र ३९२ अक्षरधियां त्ववरोधः
सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥

अधिकरण १२१ इयदधिकरणम् ॥

सूत्र ३९३ इयदामननात् ॥

अधिकरण १२२ अन्तरत्वाधिकरणम् ॥

सूत्र ३९४ अन्तरा भूतग्रामवत्स्वात्मनः
। ३९५ अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत् ॥

अधिकरण १२३ व्यतिहाराधिकरणम् ॥

सूत्र ३९६ व्यतिहारो विशिंषन्ति हीतरवत् ॥

अधिकरण १२४ सत्याद्यधिकरणम् ॥

सूत्र ३९७ सैव हि सत्यादयः ॥

अधिकरण १२५ कामाद्यधिकरणम् ॥

सूत्र ३९८ कामादीतरत्र तत्र चायतनादिभ्यः ॥

अधिकरण १२६ आदराधिकरणम् ॥

सूत्र ३९९ आदरादलोपः ।
४०० उपस्थितेऽस्तद्वचनात् ॥

अधिकरण १२७ तन्निर्धारणाधिकरणम् ॥

सूत्र ४०१ तन्निर्धारणानियमस्तद्दृष्टेः
पृथग्ध्यप्रतिबन्धः फलम् ॥

अधिकरण १२८ प्रदानाधिकरणम् ॥

सूत्र ४०२ प्रदानवदेव तदुक्तम् ॥

अधिकरण १२९ लिङ्गभुयस्त्वाधिकरणम् ॥

सूत्र ४०३ लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि ।
४०४ पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ।
४०५ अतिदेशाच्च ।
४०६ विद्यैव तु निर्धारणात् ।
४०७ दर्शनाच्च ।
४०८ श्रुत्यादिबलीयस्त्वाच्च न बाधः ।
४०९ अनुबन्धादिभ्यः
प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् ।
४१० न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ।
४११ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥

अधिकरण १३० ऐकात्म्याधिकरणम् ॥

सूत्र ४१२ एक आत्मनः शरीरे भावात् ।
४१३ व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥

अधिकरण १३१ अङ्गावबद्धाधिकरणम् ॥

सूत्र ४१४ अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ।
४१५ मन्त्रादिवद्वाऽविरोधः ॥

अधिकरण १३२ भूमज्ययस्त्वाधिकरणम् ॥

सूत्र ४१६ भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति ॥

अधिकरण १३३ शब्दादिभेदाधिकरणम् ॥

सूत्र ४१७ नाना शब्दादिभेदात् ॥

अधिकरण १३४ विकल्पाधिकरणम् ॥

सूत्र ४१८ विकल्पोऽविशिष्टफलत्वात् ॥

अधिकरण १३५ काम्याधिकरणम् ॥

सूत्र ४१९ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥

अधिकरण १३६ यथाश्रयभावाधिकरणम् ॥

सूत्र ४२० अङ्गेषु यथाश्रयभावः ।
४२१ शिष्टेश्च ।
४२२ समाहारात् ।
४२३ गुणसाधारण्यश्रुतेश्च ।

४२४ न वा तत्सहभावाश्रुतेः ।
४२५ दर्शनाच्च ॥

अध्याय ३
पाद ४
अधिकरण १३७-१५३
सूत्र ४२६-४७७

अधिकरण १३७ पुरुषार्थाधिकरणम् ॥

सूत्र ४२६ पुरुषार्थोऽतः शब्दादिति बादरायणः ।
४२७ शेषत्वात् पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ।
४२८ आचारदर्शनात् ।
४२९ तत्श्रुतेः ।
४३० समन्वारम्भणात् ।
४३१ तद्वतो विधानात् ।
४३२ नियमाच्च ।
४३३ अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ।
४३४ तुल्यं तु दर्शनम् ।
४३५ असार्वतृकी ।
४३६ विभागः शतवत् ।
४३७ अध्ययनमात्रवतः
४३८ नाविशेषात् ।
४३९ स्तुतयेऽनुमतिर्वा ।
४४० कामकारेण चैके ।
४४१ उपमर्दं च ।
४४२ ऊर्ध्वरेतःसु च शब्दे हि ॥

अधिकरण १३८ परामर्शाधिकरणम् ॥

सूत्र ४४३ परामर्शं जैमिनिरचोदना चापवदिति हि ।
४४४ अनुष्ठेयं बादरायणः साम्यश्रुतेः ।
४४५ विधिर्वा धारणवत् ॥

अधिकरण १३९ स्तुतिमात्राधिकरणम् ॥

सूत्र ४४६ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ।
४४७ भावशब्दाच्च ॥

अधिकरण १४० परिप्लवाधिकरणम् ॥

सूत्र ४४८ पारिप्लवार्था इति चेन्न विशेषितत्वात् ।
४४९ तथा चैकवाक्यतोपबन्धात् ॥

अधिकरण १४१ अग्नीन्धनाद्यधिकरणम् ॥

सूत्र ४५० अत एव चाग्नीन्धनाद्यनपेक्षा ॥

अधिकरण १४२ सर्वापेक्षाधिकरणम् ॥

सूत्र ४५१ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ।
४५२ शमदमाद्युपेतः स्यात्तथाऽपि तु
तद्विधेस्तदङ्गतया ।
तेषामवश्यानुष्ठेयत्वात् ॥

अधिकरण १४३ सर्वान्ननुमत्यधिकरणम् ॥

सूत्र ४५३ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ।
४५४ अबाधाच्च ।
४५५ अपि च स्मर्यते ।
४५६ शब्दश्चातोऽकामकारे ॥

अधिकरण १४४ आश्रमकर्माधिकरणम् ॥

सूत्र ४५७ विहितत्वाच्चाऽश्रमकर्मापि ।
४५८ सहकारित्वेन च ।
४५९ सर्वथाऽपि तु त एवोभयलिङ्गात् ।
४६० अनभिभवं च दर्शयति ॥

अधिकरण १४५ विधुराधिकरणम् ॥

सूत्र ४६१ अन्तरा चापि तु तद्दृष्टेः ।
४६२ अपि च स्मर्यते ।
४६३ विशेषानुग्रहश्च ।
४६४ अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥

अधिकरण १४६ तद्भुताधिकरणम् ॥

सूत्र ४६५ तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः
॥

अधिकरण १४७ अधिकारधिकरणम् ॥

सूत्र ४६६ न चाधिकारिकमपि पतनानुमानात्तदयोगात् ।
४६७ उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम् ॥

अधिकरण १४८ बहिरधिकरणम् ॥

सूत्र ४६८ बहिस्तूभयथाऽपि स्मृतेराचाराच्च ॥

अधिकरण १४९ स्वाम्यधिकरणम् ॥

सूत्र ४६९ स्वामिनः फलश्रुतेरित्यात्रेयः ।
४७० आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ।
४७१ श्रुतेश्च ॥

अधिकरण १५० सहकार्यन्तरविध्यधिकरणम् ॥

सूत्र ४७२ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ।
४७३ कृत्स्नभावात्तु गृहिणोपसंहारः ।
४७४ मौनवदितरेषामप्युपदेशात् ॥

अधिकरण १५१ अनाविष्कराधिकर्नम् ।
सूत्र ४७५ अनाविष्कुर्वन्नन्वयात् ॥

अधिकरण १५२ ऐहिकाधिकरणम् ॥

सूत्र ४७६ ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥

अधिकरण १५३ मुक्तिफलाधिकरणम् ॥

सूत्र ४७७ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥

अध्यायः ४ फल अधिकरण ३८ सूत्राणि ७८
पाद १
अधिकरण १५४-१६७
सूत्र ४७८-४९६

अधिकरण १५४ आवृत्त्यधिकरणम् ॥

सूत्र ४७८ आवृत्तिरसकृदुपदेशात् ।
४७९ लिङ्गाच्च ॥

अधिकरण १५५ आत्मत्वोपसनाधिकरणम् ॥

सूत्र ४८० आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥

अधिकरण १५६ प्रतिकधिकरणम् ॥

सूत्र ४८१ न प्रतीके न हि सः ॥

| | |
|---|---|
| अधिकरण | १५७ ब्रह्मदृष्ट्यधिकरणम् ॥ |
| सूत्र | ४८२ ब्रह्मदृष्टिरुत्कर्षात् ॥ |
| अधिकरण | १५८ आदित्यादिमत्यधिकरणम् ॥ |
| सूत्र | ४८३ आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ |
| अधिकरण | १५९ आसीनाधिकरणम् ॥ |
| सूत्र | ४८४ आसीनः सम्भवात् ।<br>४८५ ध्यानाच्च ।<br>४८६ अचलत्वं चापेक्ष्य ।<br>४८७ स्मरन्ति च ॥ |
| अधिकरण | १६० एकाग्रताधिकरणम् ॥ |
| सूत्र | ४८८ यत्रैकाग्रता तत्राविशेषात् ॥ |
| अधिकरण | १६१ आप्रायणाधिकरणम् ॥ |
| सूत्र | ४८९ आप्रायाणात्तत्रापि हि दृष्टम् ॥ |
| अधिकरण | १६२ तदधिगमाधिकरणम् ॥ |
| सूत्र | ४९० तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ |
| अधिकरण | १६३ इतरसंश्लेषाधिकरणम् ॥ |
| सूत्र | ४९१ इतरस्याप्येवमसंश्लेषः पाते तु ॥ |
| अधिकरण | १६४ अनारब्धाधिकरणम् ॥ |
| सूत्र | ४९२ अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ |
| अधिकरण | १६५ अग्निहोत्राद्यधिकरणम् ॥ |
| सूत्र | ४९३ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ।<br>४९४ अतोऽन्यापि ह्येकेशामुभयोः ॥ |
| अधिकरण | १६६ विद्याज्ञानसाधनाधिकरणम् ॥ |
| सूत्र | ४९५ यदेव विद्ययेति हि ॥ |
| अधिकरण | १६७ इतरक्षपणाधिकरणम् ॥ |
| सूत्र | ४९६ भोगेन त्वितरे क्षपयित्वा सम्पद्यते ॥ |
| अध्याय | ४ |

पाद २
अधिकरण १६८-१७८
सूत्र ४९७-५१७

अधिकरण १६८ वागधिकरणम् ॥

सूत्र ४९७ वाङ्मनसि दर्शनाच्छब्दाच्च ।
४९८ अत एव च सर्वाण्यनु ॥

अधिकरण १६९ मनोऽधिकरणम् ।
सूत्र ४९९ तन्मनः प्राण उत्तरात् ॥

अधिकरण १७० अध्यक्षाधिकरणम् ॥

सूत्र ५०० सोऽध्यक्षे तदुपगमादिभ्यः ।
५०१ भूतेषु तत्श्रुतेः ।
५०२ नैकस्मिन् दर्शयतो हि ॥

अधिकरण १७१ असृत्युपक्रमाधिकरणम् ॥

सूत्र ५०३ समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥

अधिकरण १७२ संसारव्यपदेशाधिकरणम् ॥

सूत्र ५०४ तदापीतेः संसारव्यपदेशात् ।
५०५ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ।
५०६ नोपमर्देनातः ।
५०७ अस्यैव चोपपत्तेरेष ऊष्मा ॥

अधिकरण १७३ प्रतिषेधाधिकरणम् ॥

सूत्र ५०८ प्रतिषेधादिति चेन्न शारीरात् ।
५०९ स्पष्टो ह्येकेषाम् ।
५१० स्मर्यते च ॥

अधिकरण १७४ वागादिलयाधिकरणम् ॥

सूत्र ५११ तानि परे तथा ह्याह ॥

अधिकरण १७५ अविभागाधिकरणम् ॥

सूत्र ५१२ अविभागो वचनात् ॥

अधिकरण १७६ तदोकोऽधिकरणम् ॥

सूत्र ५१३ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् ।

तच्छेषगत्यनुस्मृतियोगाच्च
हार्दानुगृहीतः शताधिकया ॥

| | |
|---|---|
| अधिकरण | १७७ रश्म्यधिकरणम् ॥ |
| सूत्र | ५१४ रश्म्यनुसारी ।<br>५१५ निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वात् दर्शयति च ॥ |
| अधिकरण | १७८ दक्षिणयनाधिकरणम् ॥ |
| सूत्र | ५१६ अतश्चायनेऽपि दक्षिणे ।<br>५१७ योगिनः प्रति च स्मर्यते स्मार्ते चैते ॥ |
| अध्याय | ४ |
| पाद | ३ |
| अधिकरण | १७९-१८४ |
| सूत्र | ५१८-५३३ |
| अधिकरण | १७९ अर्चिराद्यधिकरणम् ॥ |
| सूत्र | ५१८ अर्चिरादिना तत्प्रथितेः ॥ |
| अधिकरण | १८० वाय्वधिकरणम् ॥ |
| सूत्र | ५१९ वायुमब्दादविशेषविशेषाभ्याम् ॥ |
| अधिकरण | १८१ तडिदधिकरणम् ॥ |
| सूत्र | ५२० तडितोऽधि वरुणः सम्बन्धात् ॥ |
| अधिकरण | १८२ आतिवाहिकाधिकरणम् ॥ |
| सूत्र | ५२१ आतिवाहिकास्तल्लिङ्गात् ।<br>५२२ उभयव्यामोहात्तत्सिद्धेः ।<br>५२३ वैद्युतेनैव ततस्तत्श्रुतेः ॥ |
| अधिकरण | १८३ कार्याधिकरणम् ॥ |
| सूत्र | ५२४ कार्यं बादरिरस्य गत्युपपत्तेः ।<br>५२५ विशेषितत्वाच्च ।<br>५२६ सामीप्यात्तु तद्व्यपदेशः ।<br>५२७ कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ।<br>५२८ स्मृतेश्च ।<br>५२९ परं जैमिनिर्मुख्यत्वात् । |

५३० दर्शनाच्च ।
५३१ न च कार्ये प्रतिपत्त्यभिसन्धिः ॥

अधिकरण १८४ प्रतिकालम्बनाधिकरणम् ॥

सूत्र ५३२ अप्रतीकालम्बनान्नयतीति बादरायण उभयथाऽदोषात्तत्क्रतुश्च ।
५३३ विशेषं च दर्शयति ॥

अध्याय ४
पाद ४
अधिकरण १८५-१९१
सूत्र ५३४-५५५

अधिकरण १८५ सम्पद्याविर्भावाधिकरणम् ॥

सूत्र ५३४ सम्पद्याविर्भावः स्वेनशब्दात् ।
५३५ मुक्तः प्रतिज्ञानात् ।
५३६ आत्मा प्रकरणात् ॥

अधिकरण १८६ अविभागेन दृष्टत्वधिकरणम् ॥

सूत्र ५३७ अविभागेन दृष्टत्वात् ॥

अधिकरण १८७ ब्रह्माधिकरणम् ॥

सूत्र ५३८ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ।
५३९ चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ।
५४० एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ॥

अधिकरण १८८ सङ्कल्पाधिकरणम् ॥

सूत्र ५४१ सङ्कल्पादेव तु तत्श्रुतेः ।
५४२ अत एव चानन्याधिपतिः ॥

अधिकरण १८९ अभावाधिकरणम् ॥

सूत्र ५४३ अभावं बादरिराह ह्येवम् ।
५४४ भावं जैमिनिर्विकल्पामननात् ।
५४५ द्वादशाहवदुभयविधं बादरायणोऽतः ।
५४६ तन्वभावे सन्ध्यवदुपपत्तेः ।
५४७ भावे जाग्रद्वत् ॥

अधिकरण १९० प्रदीपाधिकरणम् ॥

सूत्र ५४८ प्रदीपवदावेशस्तथा हि दर्शयति ।
५४९ स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥

अधिकरण १९१ जगद्व्यापाराधिकरणम् ॥

सूत्र ५५० जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ।
५५१ प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ।
५५२ विकारावर्ति च तथा हि स्थितिमाह ।
५५३ दर्शयतश्चैवं प्रत्यक्षानुमाने ।
५५४ भोगमात्रसाम्यलिङ्गाच्च ।
५५५ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. Brahma-Sutra - adhikarana ..
was typeset on July 25, 2016

Please send corrections to *sanskrit@cheerful.com*